# Adityahridayam

# આદિત્યહૃદયમ્

## Document Information

Text title : AdityahRidayastotra

File name : adityahriday.itx

Category : hRidaya, navagraha

Location : doc_z_misc_navagraha

Transliterated by : M. Giridhar giridhar at chemeng.iisc.ernet.in

Proofread by : Kirk Wortman kirkwort at hotmail.com

Latest update : June 13, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 8, 2023

*sanskritdocuments.org*

# Adityahridayam

# આદિત્યહૃદયમ્

Introduction

Before we begin, let us bow to Aditya, the Sun god, who bestows upon us all prosperity and who is capable of destroying all our enemies.

Aditya hridyam is a hymn to the Sun god and forms part of the canto 107 of the Valmiki ramayana. The setting is the battle field and the fight between Ravana and Lord Rama has just been suspended. The latter enters into a contemplative mood and is instructed by the sage Agastya on the glory of Aditya, the Sun God.

The great acharya without any equal, Shankara acharya, established the worship of five deities : Ganesha, Vishnu, Shakti, Shiva and Aditya. The worship establishes the unique function of each deity while remembering the unity between Them. The unity between all of us is Brahman. Established in the space-time domain, the mind mistakes that the sun rises and sets. In reality, the sun is ever-present. Similarly, we mistake ourselves to be the body-mind complex and suffer, while in reality, we are Satchitananda, one without a second. To become aware of this Truth, one has to destroy all the enemies within (like kama, krodha, lobha, mada etc.) and establish our minds at the lotus feet of the divine at all times. And recitation of this hymn will accomplish this seemingly impossible feat.

Though this hymn is said to Rama, who appears to be in a state of distress, Rama is well aware of His divinity. As Sita says,

'Know Rama to be the Supreme Brahman - the existence knowledge bliss (Satchitananda) absolute, the one without a second. He is pure consciousness devoid of all adjuncts, whom the senses can not perceive as their object.'

But Rama behaved very much like a human to set an example to all of us humans. By His grace, we have the teachings of Yoga Vasistha since Rama pretended to be ignorant and

asked questions to vasistha. Similarly, here we obtain an hymn capable of destroying all our internal enemies and which will bestow supreme felicity upon us, because Rama pretends to be distressed. Rama's behaviour is also to set an example on how outwardly we may act our roles and pretend to be happy or sad, while inwardly understanding that the world is merely a mirage and the only reality is the Self, Brahman.

॥ અથ સાર્થ આદિત્યહૃદયમ્ ॥

તતો યુદ્ધપરિશ્રાન્તં સમરે ચિન્તયા સ્થિતમ્ ।
રાવણં ચાગ્રતો દૃષ્ટ્વા યુદ્ધાય સમુપસ્થિતમ્ ॥ ૧॥

દૈવતૈશ્ચ સમાગમ્ય દ્રષ્ટુમભ્યાગતો રણમ્ ।
ઉપાગમ્યાબ્રવીદ્રામમગસ્ત્યો ભગવાનૃષિઃ ॥ ૨॥

Rama, exhausted and about to face Ravana ready for a fresh battle was lost deep in contemplation. The all knowing sage agastya who had joined the gods to witness the battle spoke to Rama thus .. 1,2

રામ રામ મહાબાહો શ‌ૃણુ ગુહ્યં સનાતનમ્ ।
યેન સર્વાનરીન્વત્સ સમરે વિજયિષ્યસિ ॥ ૩॥

Oh Rama, mighty-armed Rama, listen to this eternal secret which will help you destroy all your enemies in battle. 3

આદિત્યહૃદયં પુણ્યં સર્વશત્રુવિનાશનમ્ ।
જયાવહં જપેન્નિત્યમક્ષયં પરમં શિવમ્ ॥ ૪॥

This holy hymn dedicated to the Sun deity will result in destroying all enemies and bring you victory and never ending supreme bliss. 4

સર્વમઙ્ગલમાઙ્ગલ્યં સર્વપાપપ્રણાશનમ્ ।
ચિન્તાશોકપ્રશમનં આયુર્વર્ધનમુત્તમમ્ ॥ ૫॥

This hymn is supreme and is a guarantee of complete prosperity and is the destroyer of sin, anxiety, anguish and is the bestower of longevity. 5

રશ્મિમન્તં સમુદ્યન્તં દેવાસુરનમસ્કૃતમ્ ।
પૂજયસ્વ વિવસ્વન્તં ભાસ્કરં ભુવનેશ્વરમ્ ॥ ૬॥

Worship the One, possessed of rays when he has completely risen, held in reverence by the devas and asuras, and who is the Lord of the

universe by whose efflugence all else brighten. 6

સર્વદેવાત્મકો હ્યેષ તેજસ્વી રશ્મિભાવનઃ ।
એષ દેવાસુરગણાઁલ્લોકાન્ પાતિ ગભસ્તિભિઃ ॥ ૭ ॥

He indeed represent the totality of all celestial beings. He is self-luminous and sustains all with his rays. He nourishes and energizes the inhabitants of all the worlds and the race of Devas and Asuras. 7

એષ બ્રહ્મા ચ વિષ્ણુશ્ચ શિવઃ સ્કન્દઃ પ્રજાપતિઃ ।
મહેન્દ્રો ધનદઃ કાલો યમઃ સોમો હ્યપાં પતિઃ ॥ ૮ ॥

He is Brahma, Vishnu, Shiva, Skands, Prajapati. He is also Mahendra, kubera, kala, yama, soma and varuna. 8

પિતરો વસવઃ સાધ્યા હ્યશ્વિનૌ મરુતો મનુઃ ।
વાયુર્વહ્નિઃ પ્રજાપ્રાણ ઋતુકર્તા પ્રભાકરઃ ॥ ૯ ॥

He is the pitrs, vasus, sadhyas, aswini devas, maruts, manu, vayu, agni, prana and, being the source of all energy and light, is the maker of all the six seasons. 9

આદિત્યઃ સવિતા સૂર્યઃ ખગઃ પૂષા ગભસ્તિમાન્ ।
સુવર્ણસદૃશો ભાનુર્હિરણ્યરેતા દિવાકરઃ ॥ ૧૦ ॥ or ભાનુર્વિશ્વરેતા

He is the son of Aditi, creator of the universe, inspirer of action, transverser of the heavens. He is the sustainer, illumination of all directions, the golden hued brilliance and is the maker of the day. 10

હરિદશ્વઃ સહસ્રાર્ચિઃ સપ્તસપ્તિર્મરીચિમાન્ ।
તિમિરોન્મથનઃ શમ્ભુસ્ત્વષ્ટા માર્તાણ્ડ અંશુમાન્ ॥ ૧૧ ॥ or માર્તણ્ડ

He is the Omnipresent One who pervades all with countless rays. He is the power behind the seven sense organs, the dispeller of darkness, bestower of happiness and prosperity, the remover of misfortunes and is the infuser of life. 11

હિરણ્યગર્ભઃ શિશિરસ્તપનો ભાસ્કરો રવિઃ ।
અગ્નિગર્ભોઽદિતેઃ પુત્રઃ શઙ્ખઃ શિશિરનાશનઃ ॥ ૧૨ ॥

He is the primordial BEing manifesting as the Trinity. He ushers in the Day and is the teacher (of Hiranyagarbha), the fire-wombed, the son of Aditi, and has a vast and supreme felicity. He is the remover of intellectual dull-headedness. 12

વ્યોમનાથસ્તમોભેદી ઋગ્યજુઃસામપારગઃ ।
ઘનવૃષ્ટિરપાં મિત્રો વિન્ધ્યવીથી પ્લવઙ્ગમઃ ॥ ૧૩ ॥

He is the Lord of the firmament, dispeller of darkness. Master of all the vedas, he is a friend of the waters and causes rain. HE has crossed the vindya range and sports in the Brahma Nadi. 13

આતપી મણ્ડલી મૃત્યુઃ પિઙ્ગલઃ સર્વતાપનઃ ।
કવિર્વિશ્વો મહાતેજાઃ રક્તઃ સર્વભવોદ્ભવઃ ॥ ૧૪ ॥

He, whose form is circular and is colored yellow, is intensely absorbed and inflicts death. He is the destroyer of all and is the Omniscient one being exceedingly energetic sustains the universe and all action. 14

નક્ષત્રગ્રહતારાણામધિપો વિશ્વભાવનઃ ।
તેજસામપિ તેજસ્વી દ્વાદશાત્મન્નમોઽસ્તુ તે ॥ ૧૫ ॥

He is the lord of stars, planets and all constellations. He is the origin of everything in the universe and is the cause of the lustre of even the brilliant ones. Salutations to Thee who is the One being manifest in the twelve forms of the Sun. 15

નમઃ પૂર્વાય ગિરયે પશ્ચિમાયાદ્રયે નમઃ ।
જ્યોતિર્ગણાનાં પતયે દિનાધિપતયે નમઃ ॥ ૧૬ ॥

Salutations to the Eastern and western mountain, Salutations to the Lord of the stellar bodies and the Lord of the Day. 16

જયાય જયભદ્રાય હર્યશ્વાય નમો નમઃ ।
નમો નમઃ સહસ્રાંશો આદિત્યાય નમો નમઃ ॥ ૧૭ ॥

Salutations to the One who ordains victory and the prosperity that follows. Salutations to the one possessed of yellow steeds and to the thousand rayed Lord, and to Aditya. 17

નમ ઉગ્રાય વીરાય સારઙ્ગાય નમો નમઃ ।
નમઃ પદ્મપ્રબોધાય માર્તાણ્ડાય નમો નમઃ ॥ ૧૮ ॥ or માર્તણ્ડાય, પ્રચણ્ડાય

Salutations to the Terrible one, the hero, the one that travels fast. Salutations to the one whose emergence makes the lotus blossom and to the fierce and omnipotent one. 18

બ્રહ્મેશાનાચ્યુતેશાય સૂર્યાયાદિત્યવર્ચસે ।
ભાસ્વતે સર્વભક્ષાય રૌદ્રાય વપુષે નમઃ ॥ ૧૯ ॥

Salutations to the Lord of Brahma, shiva and Achyuta, salutations to the powerful and to the effulgence in the Sun that is both the illuminator and devourer of all and is of a form that is fierce like Rudra. 19

તમોઘ્નાય હિમઘ્નાય શત્રુઘ્નાયામિતાત્મને ।
કૃતઘ્નઘ્નાય દેવાય જ્યોતિષાં પતયે નમઃ ॥ ૨૦ ॥

Salutations to he transcendental atman that dispels darkness, drives away all fear, and destroys all foes. Salutations also to the annihilator of the ungrateful and to the Lord of all the stellar bodies. 20

તપ્તચામીકરાભાય વહ્નયે વિશ્વકર્મણે । or હરયે વિશ્વકર્મણે
નમસ્તમોઽભિનિઘ્નાય રુચયે લોકસાક્ષિણે ॥ ૨૧ ॥

Salutations to the Lord shining like molten gold, to the transcendental fire, the fire of supreme knowledge, the architect of the universe, destroyer of darkness and salutations again to the efflugence that is the Cosmic witness. 21

નાશયત્યેષ વૈ ભૂતં તદેવ સૃજતિ પ્રભુઃ ।
પાયત્યેષ તપત્યેષ વર્ષત્યેષ ગભસ્તિભિઃ ॥ ૨૨ ॥

Salutations to the Lord who destroys everything and creates them again. Salutations to Him who by His rays consumes the waters, heats them up and sends them down as rain. 22

એષ સુપ્તેષુ જાગર્તિ ભૂતેષુ પરિનિષ્ઠિતઃ ।
એષ એવાગ્નિહોત્રં ચ ફલં ચૈવાગ્નિહોત્રિણામ્ ॥ ૨૩ ॥

Salutations to the Lord who abides in the heart of all beings keeping awake when they are asleep. He is both the sacrificial fire and the fruit enjoyed by the worshippers. 23

વેદાશ્ચ ક્રતવશ્ચૈવ ક્રતૂનાં ફલમેવ ચ ।
યાનિ કૃત્યાનિ લોકેષુ સર્વ એષ રવિઃ પ્રભુઃ ॥ ૨૪ ॥

The Sun is verily the Lord of all action in this universe. He is verily the vedas, the sacrifices mentioned in them and the fruits obtained by performing the sacrifices. 24

॥ ફલ શ્રુતિઃ ॥

એનમાપત્સુ કૃચ્છ્રેષુ કાન્તારેષુ ભયેષુ ચ ।
કીર્તયન્ પુરુષઃ કશ્ચિન્નાવસીદતિ રાઘવ ॥ ૨૫ ॥

Raghava, one who recites this hymn in times of danger, during an affliction or when lost in the wilderness and having fear, he will not lose heart (and become brave). 25

પૂજયસ્વૈનમેકાગ્રો દેવદેવં જગત્પતિમ્ ।
એતત્ ત્રિગુણિતં જપ્ત્વા યુદ્ધેષુ વિજયિષ્યસિ ॥ ૨૬॥

Raghava, worship this Lord of all Gods and the Universe with one-pointed devotion. Recite this hymn thrice and you will win this battle. 26

અસ્મિન્ક્ષણે મહાબાહો રાવણં ત્વં વધિષ્યસિ ।
એવમુક્ત્વા તદાઽગસ્ત્યો જગામ ચ યથાગતમ્ ॥ ૨૭॥

O mighty armed one, you shall truimph over Ravana this very moment. Having spoken this, Agastya returned his original place. 27

એતચ્છ્રુત્વા મહાતેજા નષ્ટશોકોઽભવત્તદા ।
ધારયામાસ સુપ્રીતો રાઘવઃ પ્રયતાત્મવાન્ ॥ ૨૮॥

Raghava became free from worry after hearing this. He was greatly pleased and became brave and energetic. 28

આદિત્યં પ્રેક્ષ્ય જપ્ત્વા તુ પરં હર્ષમવાપ્તવાન્ ।
ત્રિરાચમ્ય શુચિર્ભૂત્વા ધનુરાદાય વીર્યવાન્ ॥ ૨૯॥

Gazing at the sun with devotion, He recited this hymn thrice and experienced bliss. Purifying Himself by sipping water thrice, He took up His bow with His mighty arms. 29

રાવણં પ્રેક્ષ્ય હૃષ્ટાત્મા યુદ્ધાય સમુપાગમત્ ।
સર્વ યત્નેન મહતા વધે તસ્ય ધૃતોઽભવત્ ॥ ૩૦॥

Seeing Ravana coming to fight, He put forth all his effort with a determination to destroy Ravana. 30

અથ રવિરવદન્નિરીક્ષ્ય રામં
મુદિતમનાઃ પરમં પ્રહૃષ્યમાણઃ ।
નિશિચરપતિસઙ્ક્ષયં વિદિત્વા
સુરગણમધ્યગતો વચસ્ત્વરેતિ ॥ ૩૧॥

Then knowing that the destruction of the lord of prowlers at night (Ravana) was near, Aditya, who was at the center of the assembly of the Gods, looked at Rama and exclaimed 'Hurry up' with great delight. 31

॥ ઇતિ આદિત્યહૃદયં મન્ત્રમ્ ॥

સ્તોત્રપાઠ

ૐ અસ્ય શ્રીઆદિત્યહૃદયસ્તોત્રમન્ત્રસ્ય શ્રીઅગસ્ત્યઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । શ્રીઆદિત્યહૃદયભૂતો ભગવાન્ બ્રહ્મા
દેવતાઃ । ૐ બીજમ્ । રશ્મિમતેરિતિ શક્તિઃ ।
ૐ તત્સવિતુરિત્યાદિગાયત્રી કીલકમ્ । નિરસ્તાશેષવિઘ્નતયા
બ્રહ્મવિદ્યાસિદ્ધૌ સર્વત્ર જયસિદ્ધૌ ચ વિનિયોગઃ ।

અથ ઋષ્યાદિન્યાસઃ ॥

ૐ અગસ્ત્યઋષયે નમઃ શિરસિ ।
અનુષ્ટુપ્છન્દસે નમઃ મુખે ।
આદિત્યહૃદયભૂતબ્રહ્મદેવતાયૈ નમઃ। હૃદિ ।
ૐ બીજાય નમઃ ગુહ્યે ।
ૐ રશ્મિમતે શક્તયે નમઃ પાદયોઃ ।
ૐ તત્સવિતુરિત્યાદિગાયત્રી કીલકાય નમઃ નાભૌ ।
વિનિયોગાય નમઃ સર્વાઙ્ગે ।
ઇતિ ઋષ્યાદિન્યાસઃ ॥

અથ કરન્યાસઃ ॥

ૐ રશ્મિમતે અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ સમુદ્યતે તર્જનીભ્યાં નમઃ ।
ૐ દેવાસુરનમસ્કૃતાય મધ્યમાભ્યાં નમઃ ।
ૐ વિવસ્વતે અનામિકાભ્યાં નમઃ ।
ૐ ભાસ્કરાય કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ ભુવનેશ્વરાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
ઇતિ કરન્યાસઃ ॥

અથ હૃદયાદિષડઙ્ગ ન્યાસઃ ॥

ૐ રશ્મિમતે હૃદયાય નમઃ ।
ૐ સમુદ્યતે શિરસે સ્વાહા ।
ૐ દેવાસુરનમસ્કૃતાય શિખાયૈ વષટ્ ।
ૐ વિવસ્વતે કવચાય હુમ્ ।
ૐ ભાસ્કરાય નેત્રત્રયાય વૌષટ્ ।
ૐ ભુવનેશ્વરાય અસ્ત્રાય ફટ્ ।

ઇતિ હૃદયાદિષડઙ્ગ ન્યાસઃ ॥

॥ અથ આદિત્યહૃદયમ્ ॥

તતો યુદ્ધપરિશ્રાન્તં સમરે ચિન્તયા સ્થિતમ્ ।
રાવણં ચાગ્રતો દૃષ્ટ્વા યુદ્ધાય સમુપસ્થિતમ્ ॥ ૧॥

દૈવતૈશ્ચ સમાગમ્ય દ્રષ્ટુમભ્યાગતો રણમ્ ।
ઉપાગમ્યાબ્રવીદ્રામમગસ્ત્યો ભગવાનૃષિઃ ॥ ૨॥

રામ રામ મહાબાહો શ‍ૃણુ ગુહ્યં સનાતનમ્ ।
યેન સર્વાનરીન્વત્સ સમરે વિજયિષ્યસિ ॥ ૩॥

આદિત્યહૃદયં પુણ્યં સર્વશત્રુવિનાશનમ્ ।
જયાવહં જપેન્નિત્યમક્ષયં પરમં શિવમ્ ॥ ૪॥

સર્વમઙ્ગલમાઙ્ગલ્યં સર્વપાપપ્રણાશનમ્ ।
ચિન્તાશોકપ્રશમનં આયુર્વર્ધનમુત્તમમ્ ॥ ૫॥

રશ્મિમન્તં સમુદ્યન્તં દેવાસુરનમસ્કૃતમ્ ।
પૂજયસ્વ વિવસ્વન્તં ભાસ્કરં ભુવનેશ્વરમ્ ॥ ૬॥

સર્વદેવાત્મકો હ્યેષ તેજસ્વી રશ્મિભાવનઃ ।
એષ દેવાસુરગણાઁલ્લોકાન્ પાતિ ગભસ્તિભિઃ ॥ ૭॥

એષ બ્રહ્મા ચ વિષ્ણુશ્ચ શિવઃ સ્કન્દઃ પ્રજાપતિઃ ।
મહેન્દ્રો ધનદઃ કાલો યમઃ સોમો હ્યપાં પતિઃ ॥ ૮॥

પિતરો વસવઃ સાધ્યા હ્યશ્વિનૌ મરુતો મનુઃ ।
વાયુર્વહ્નિઃ પ્રજાપ્રાણ ઋતુકર્તા પ્રભાકરઃ ॥ ૯॥

આદિત્યઃ સવિતા સૂર્યઃ ખગઃ પૂષા ગભસ્તિમાન્ ।
સુવર્ણસદૃશો ભાનુર્હિરણ્યરેતા દિવાકરઃ ॥ ૧૦॥ or ભાનુર્વિશ્વરેતા
હરિદશ્વઃ સહસ્રાર્ચિઃ સપ્તસપ્તિર્મરીચિમાન્ ।
તિમિરોન્મથનઃ શમ્ભુસ્ત્વષ્ટા માર્તાણ્ડ અંશુમાન્ ॥ ૧૧॥ or માર્તણ્ડ
હિરણ્યગર્ભઃ શિશિરસ્તપનો ભાસ્કરો રવિઃ ।
અગ્નિગર્ભોઽદિતેઃ પુત્રઃ શઙ્ખઃ શિશિરનાશનઃ ॥ ૧૨॥

વ્યોમનાથસ્તમોભેદી ઋગ્યજુઃસામપારગઃ ।
ઘનવૃષ્ટિરપાં મિત્રો વિન્ધ્યવીથી પ્લવઙ્ગમઃ ॥ ૧૩॥

આતપી મણ્ડલી મૃત્યુઃ પિઙ્ગલઃ સર્વતાપનઃ ।
કવિર્વિશ્વો મહાતેજાઃ રક્તઃ સર્વભવોદ્ભવઃ ॥ ૧૪॥

નક્ષત્રગ્રહતારાણામધિપો વિશ્વભાવનઃ ।
તેજસામપિ તેજસ્વી દ્વાદશાત્મન્નમોઽસ્તુ તે ॥ ૧૫॥

નમઃ પૂર્વાય ગિરયે પશ્ચિમાયાદ્રયે નમઃ ।
જ્યોતિર્ગણાનાં પતયે દિનાધિપતયે નમઃ ॥ ૧૬॥

જયાય જયભદ્રાય હર્યશ્વાય નમો નમઃ ।
નમો નમઃ સહસ્રાંશો આદિત્યાય નમો નમઃ ॥ ૧૭॥

નમ ઉગ્રાય વીરાય સારઙ્ગાય નમો નમઃ ।
નમઃ પદ્મપ્રબોધાય માર્તાણ્ડાય નમો નમઃ ॥ ૧૮॥ or માર્તણ્ડાય, પ્રચણ્ડાય

બ્રહ્મેશાનાચ્યુતેશાય સૂર્યાયાદિત્યવર્ચસે ।
ભાસ્વતે સર્વભક્ષાય રૌદ્રાય વપુષે નમઃ ॥ ૧૯॥

તમોઘ્નાય હિમઘ્નાય શત્રુઘ્નાયામિતાત્મને ।
કૃતઘ્નઘ્નાય દેવાય જ્યોતિષાં પતયે નમઃ ॥ ૨૦॥

તપ્તચામીકરાભાય વહ્નયે વિશ્વકર્મણે । or હરયે વિશ્વકર્મણે
નમસ્તમોઽભિનિઘ્નાય રુચયે લોકસાક્ષિણે ॥ ૨૧॥

નાશયત્યેષ વૈ ભૂતં તદેવ સૃજતિ પ્રભુઃ ।
પાયત્યેષ તપત્યેષ વર્ષત્યેષ ગભસ્તિભિઃ ॥ ૨૨॥

એષ સુપ્તેષુ જાગર્તિ ભૂતેષુ પરિનિષ્ઠિતઃ ।
એષ એવાગ્નિહોત્રં ચ ફલં ચૈવાગ્નિહોત્રિણામ્ ॥ ૨૩॥

વેદાશ્ચ ક્રતવશ્ચૈવ ક્રતૂનાં ફલમેવ ચ ।
યાનિ કૃત્યાનિ લોકેષુ સર્વ એષ રવિઃ પ્રભુઃ ॥ ૨૪॥

॥ ફલશ્રુતિઃ ॥

એનમાપત્સુ કૃચ્છ્રેષુ કાન્તારેષુ ભયેષુ ચ ।
કીર્તયન્ પુરુષઃ કશ્ચિન્નાવસીદતિ રાઘવ ॥ ૨૫॥

પૂજયસ્વૈનમેકાગ્રો દેવદેવં જગત્પતિમ્ ।
એતત્ ત્રિગુણિતં જપ્ત્વા યુદ્ધેષુ વિજયિષ્યસિ ॥ ૨૬॥

અસ્મિન્ક્ષણે મહાબાહો રાવણં ત્વં વધિષ્યસિ ।

એવમુક્ત્વા તદાઽગસ્ત્યો જગામ ચ યથાગતમ્ ॥ ૨૭॥

એતચ્છ્રુત્વા મહાતેજા નષ્ટશોકોઽભવત્તદા ।
ધારયામાસ સુપ્રીતો રાઘવઃ પ્રયતાત્મવાન્ ॥ ૨૮॥

આદિત્યં પ્રેક્ષ્ય જપ્ત્વા તુ પરં હર્ષમવાપ્તવાન્ ।
ત્રિરાચમ્ય શુચિર્ભૂત્વા ધનુરાદાય વીર્યવાન્ ॥ ૨૯॥

રાવણં પ્રેક્ષ્ય હૃષ્ટાત્મા યુદ્ધાય સમુપાગમત્ ।
સર્વ યત્નેન મહતા વધે તસ્ય ધૃતોઽભવત્ ॥ ૩૦॥

અથ રવિરવદન્નિરીક્ષ્ય રામં
મુદિતમનાઃ પરમં પ્રહૃષ્યમાણઃ ।
નિશિચરપતિસઙ્ક્ષયં વિદિત્વા
સુરગણમધ્યગતો વચસ્ત્વરેતિ ॥ ૩૧॥

ઇતિ આદિત્યહૃદયં મન્ત્રમ્ ॥

Aditya Hridayam is Sarga 105 in Yuddha Kanda of Valmiki Ramayana (Gita Press, 1995, 4th edn.)

Encoded and translated by M. Giridhar

*Adityahridayam*

pdf was typeset on October 8, 2023

Please send corrections to *sanskrit@cheerful.com*